Bhadrapadarjun

Veer Shaiva pradipika

वीर शैव प्रदीपिका।

Sanskrit

Paper - Handwritten

1938 Sambad (137 years)

36 folio (Folio No. 15 missing)

8.3" x 4.5"

~~Complete~~ Complete

॥ ६॥ अथ वीरशैवप्रदीपिकाप्रारंभमस्तु ॥ ६॥ श्री ॥

श्रीगणेशायनमः। अथवीरशैवोत्कर्षप्रदीपिकाप्रारंभः।।
श्रीशिवंसच्चिदानंदलक्षणंसर्वकारणं। महालिंगाभि
धंनौमिसमुपास्यंमुमुक्षुभिः। गुरुमनादिनिरंजनमं
गमंपरमसद्गुणसौख्यपरायणं। अगतितोंटदसिद्धम
हेश्वरंप्रथितनामजुषंप्रणमाम्यहं।२। लीलामूर्तिरनो
दिजंगममयश्रीतोंटसिद्धेश्वरस्वैरोदामरूपाकरा
क्षलहरीप्राक्षेपदेशोन्नतिः।३। धर्मात्साधुसमीरयन्न
स्वभजकान्श्रीवीरशैवोचितान्बोधंनोमिमलंददा
तुमुदितश्रीशांतवीरोयतिः।४। शांतवीरगुरुभूरिमतरूपा

सतनुर्नतदामोश्नुते शृतासइद्वहंतस्तत्समाशत। अस्यार्थः।
हे ब्रह्मणस्पते लिंगं तत्त्वमसंज्ञिकमित्यादिवचनप्रामाण्यात्॥
लिंगरूपशरीरावच्छेदेनशरीरिभावेनाधिष्ठितपरमशिव।
तेततवतत्। ब्रह्मपदवाच्यलिंगरूपंशरीरंपवित्रंशुच्यशुचि
कालेपिधर्तुंयोग्यत्वात्। विततंप्रसिद्धंअथवाइष्टादिभेदेन।
भक्तशरीरादिभेदेनवाबहुविधंप्रभुर्निग्रहानुग्रहसमर्थः।
त्वंविश्वतःसमस्तानिसार्वविभक्तिकस्तसिल्गात्राणिभ
क्तशरीराणिपर्येषिव्याप्नोषिधार्यमाणःसन्लिंगरूपशरीर।

धाराभक्तांगसंयुक्तोसीत्यर्थः। अथवा विश्वतः प्रभुः विश्व।
शब्देन विश्वांतःपातिनः पशवो लक्ष्यंते ब्रह्माद्याः स्थावरां॥।
२ ताश्चदेवदेंस्यशूलिनः। पशवः परिकीर्त्यंते संसारवशव।
र्तिनः। तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः। इति वच
नात् ब्रह्मादिपशूनां नियामकः। गात्राणि स्थूलसूक्ष्मकारणश
रीरेंद्रियांतःकरणादीनि सर्वांगानि पर्यैषि। अथो षिइंद्रियादागतं
किंचिद्विषयसुखं तच्छिवार्पितं। तत्प्रसादं भोक्तव्यं तदिंद्रियमुखेन
च। इष्टलिंगं तु बाह्यांगे प्राणलिंगं तथांतरे। भावलिंगं सदैवा।
स्मिन् नामांगे सुप्रतिष्ठितं। हृदयांगे महालिंगं श्रोत्रांगे सुप्रसादकं।

ब्रह्मांगे चर लिंगं तु हृदंगे शिवलिंगकं। जिह्वांगे गुरुलिंगं तु नासि-
कांगे तथैव च। आचार लिंगमश्रांतं सुप्रतिष्ठितमेव हि। यथा
स्थानेंद्रियांगेषु क्रमात् लिंगं प्रतिष्ठितं। इति वातुलागमवचनप्रा
माण्यात् स्वसंयोगात् शब्दादि विषयान्निरस्य तेष्विंद्रियेषु स्वयं।
स्थितत्वा शब्दादि विषयान् स्वीकृत्य पश्चात् प्रसादरूपान्ता
न्विषयान् तेभ्यो दत्वा पवित्राणि करोषीत्यर्थः। तथा च अनंतसत।
नुः। ननु त्रयगतानादिमलत्रयमसौ गुरुः। दीक्षात्रयेण निर्द
ग्ध्वा लिंगत्रयमुपादिशदिति शंकरसंहितावचनेन वेधा
मनुक्रियारूपदीक्षात्रयेण निर्दग्धपापपंजरः। अथवा तप

साब्रह्मजिज्ञासस्येतितैत्तरीयोपनिषद्वाक्यात्।अतसाःअ
निगृहीताःतनबइंद्रियाणियस्यसोतएतनुःअविजितेंद्रि
यइत्यर्थः।श्रोत्रनेत्रेंद्रियैअतिरिक्तायास्तनोरभावोतनु।
शब्दस्त्विंद्रियपरइत्येवमंतरम्।आमःअपरिपक्वांतःकरणः।
तत्तलिंगंनाश्नुतेनप्राप्नोतिकेपुनःप्राप्नुवंतीत्याकांक्षायांश्रि
तासःशिवधर्माश्रिताःइतलिंगंवहंतःधारयंतिकिंचतत।
एवतत्प्रसिध्धंशिवपदंसमाश्नुत।धारयेद्यस्तुहस्तादौलिंगा
कारंशिवंसदा।तस्यहस्तस्थितंविद्धिमत्पदंसंपदांपदं।इति।
प्रामाण्यात्प्राप्नुवंतीत्यर्थः।अस्मिन्नर्थेउपब्रह्मणवचनानि॥

ब्रह्मेति लिंगमाख्यातं ब्रह्मणस्य निरीश्वरः। पवित्रं तद्धि विख्याता तं तत्संपर्कान्तमश्नुचि। अग्निसाह पवित्रं ते विततं ब्रह्मणस्पते। तस्मात्पवित्रं तल्लिंगं धार्यं शैवमनामयं। अतप्ततनुरज्ञो वै आमः संस्कारवर्जितः। दीक्षया रहितः साक्षान्नामुया लिंगमुत्तमं। यः करोति तपः पूर्वं स तप्ततनुरुच्यते। परिपक्वो विमोक्षाय सोऽश्नुते लिंगधारणं। न करोति तपः पूर्वं सोऽतप्ततनुरुच्यते॥ अपक्वोऽयं विमोक्षाय नाश्नुते लिंगधारणं। शिवधर्माश्रिताः शांताः शिवा[illegible]परायणाः। ये वहंतः सदा लिंगं ते यांति परमं पदं। अथ तैत्तरीयोपनिषदि। ॐ नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारद।

नु

ताभूयासंकर्णयोः श्रुतंमा च्योढवंममामुष्य। ॐ। अस्यार्थः।
नमोब्रह्मणेब्रह्मणस्पतिरीशोयंब्रह्मेत्तलिंगमुच्यते। इतिस्कं
दवचनेनअलिंगमेकमव्यक्तंलिंगंब्रह्मेतिनिश्चितमिती॥
श्वरगीतावचनेनब्रह्मणेलिंगमूर्तयइतिलिंगपुराणवच
नेनज्योतिरूपेपरोक्षेलिंगाख्येब्रह्मरूपेइत्यपराधस्तोत्रेशंक
राचार्यवाक्येनचब्रह्मणेलिंगमूर्तयेनमइतिपुरुषैर्नमस्का
रभक्तिपुरस्सरंलिंगधारणंयाचितंधारणंतद्ब्रह्मरूपशिव
लिंगधारणंमेममअस्तुभूयात्अनिराकरणंउत्तमांगेगलेवा
पिकक्षेवक्षस्थलेपिवा। तथाहस्ततलेवापिप्राणलिंगंधरे।

नाहं धारइतादेवान्न भूयासं मज्जन्तः सुराः। नशक्नुवंति।
मांतर्हं मज्जंतं मत्सुसागरे। उध्दवं ममेदमो लिंगमाश्राममु
ष्यसमाश्रये। किंच। ॐ मितिब्रह्मपरमं लिंगाकारं महे।
श्वरं। सर्वावस्थासुसर्वेषु कालेषु निमिषार्धतः। अवि।
योगेनभुक्तिंचमुक्तिमिच्छन्द्विजोत्तमः। धारयेत्संचसु
स्थानेष्वस्मिन्संलग्नमानसः। उपदिष्टं च गुरूणा कर्णि
नं दिव्यरूपभाक्। वेदसिध्दं मंत्रराजं जपेत्पंचाक्षरं सदा। अ
स्मिन्नर्थे धारयिताभूयासमितिहिश्रुतिः। हस्तसिंहासने
लिंगमप्रमादेनधारयेत्। प्रमादात्पतिते लिंगे सह प्राणान्

परित्यजेत् । पतिते प्राणलिंगे यः प्राणान्न धत्ते नराधमः । स चंडाल इति ज्ञेयस्सर्वकर्मबहिष्कृतः । लिंगपातिनमाचार निंदकं न हृदि स्मरेत् । वीरशैवक्रमं प्रोक्तं प्रायश्चित्तादिवर्जितं । शुद्धशैवे विशेषेण मंत्रतंत्रप्रचारणात् । शुद्धो भवति लोपेषु प्रायश्चित्तविधानतः । प्राणलिंगव्रतेलुप्ते प्रायश्चित्तं न विद्यते । प्राणत्यागात्परं तस्मात्सावधानेन धारयेत् । संस्कृत्य सगुरुर्णा दत्तं षडध्वन्यासपूर्वकं । वामहस्ततले लिंगं । सावधानेन पूजयेत् । इत्यादीनि ब्रह्मांडपुराणशंकरसंहिताबातुलागमाद्युपब्रह्मणवचनानि बहूनि संति । यजुर्वेदे रुद्रैकादशिन्यां । या ते रुद्र शिवा तनूरघोरापापकाशिनी तयान ।

स्तनुवाशांतमयाशिशिशांताभिध्याकशी:। अस्यार्थ:। रुदंरोदनं
संसारदुःखजनितं द्रावयतीति रुद्रः। रुदमज्ञानं द्रावयतीति।
वा रुद्र: हे रुद्र अघोराशांताकाराशिवामंगलप्रदाया तेतनूः
लिंगरूपशरीरं सा अपापकाशिनी अपापेषु पापरहितेषु का
शत इत्यपापकाशिनी। लिंगरूपशरीरावच्छिन्न: शिव:। शम
दमादिसंपन्नभक्तगात्रे धार्यइतिपर्यवसितोर्थः। तत्रआग।
रूकैस्तनुसंधेयं। अथवाहेरुद्रतेनवशिवानिर्दोषत्वेन निरति
शयकल्याणगुणाकरत्वेन च शिवंकरत्वेन च प्रसिद्धायातनूः लिं
गंतु शिवयोर्देह इत्यागमवाक्यात् लिंगरूपिणीमूर्तिः अघोराशिवयो
गेनैवहृदयंगमाकिंच अपापाः शिवदीक्षयाविगतकल्मषाः अथ

वा अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनां। नराणां क्षीणपा
पानां शिवभक्तिः प्रजायते। प्रसादात् देवताभक्तिः प्रसादो भ
क्तिसंभवः। यथैवांकुरतो बीजं बीजतो वा यथांकुरः। इत्यादि
वचनप्रामाण्याद्बहुजन्मकृतैः पुण्यैः प्रक्षीणपापपंजराः। ये के
नचसंतितएवअपापाइत्यर्थः। अपापेषु भक्तेषु काशिनी र
ह्प्राणभावलिंगरूपेण सुप्रकाशिनीत्यर्थः। गिरिशंत गि
रौ कैलासे शंसुखोपासकानां निरतिशयानंदस्वरूपं सुखं त
नोतीति गिरिशंतः हे गिरिशंत शंतमया सुखतमया तया।
लिंगस्वरूपया तनुवा शरीरेण नः अस्माकं अभिचाकशीः।
संसारनिमित्तं पुण्यपापसंचयं प्रणश्य साक्षात्प्रकाशस्वेत्यर्थः। अ

त्रोपबृह्मणवचनानि। स्कांदे। लिंगं शिवा तनूः प्रोक्ता मूर्ति ।
र्घोरतनूस्मृता। अपापेषु च भक्तेषु तयोर्मध्ये शिवा तनूः ।
काशतेपरमे शश्वत् शिष्टास्ते लिंगधारिणः। अघोरापापका ।
शीतियातेरुद्र शिवा तनूः। यजुःशाखीय तेयस्मात्तस्मा छैवो
घवर्जितः। नित्यं भाति तदंगेषु यातेरुद्र शिवा तनूः। अघो
रापापकाशीति श्रुतिराह सनातनी। किंच। हरदत्ताचार्य
कृतेचतुर्वेदतात्पर्यसंग्रहे अपापकाशीति वपुः श्रुतं ते ।
शिष्टाः प्रसिद्धा भगवन्नपापाः। अतस्त्वदीयानपहाय भक्ता
नन्यान शिष्टा इति निश्चिनोमि। एवं युंजानः प्रथमं मनइत्यादि।

श्रुतीनां नीलकंठाचार्यमंचणपंडितमायिदेवप्रभृतिभिः लिं
गधारणपरत्वेन व्याख्यातत्वात्। ननु भवदुदाहृतश्रुतीनां भा
ष्यकृद्भिः लिंगधारणपरतया अव्याख्यातत्वात्कथमुपबृंहणव
चनानां प्रामाण्यमिति चेन्न। यश्च तु वेद विद्विप्रः पुराणं वेत्ति
नार्थतः तं दृष्ट्वा भयमाप्नोति वेदो मां प्रतरेदिति सूतसंहिता
वचनात्। इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्। बिभेत्य
ल्पश्रुताद्वेदो मामयं प्रतरेदिति महाभारते व्यासवचनाच्च पू
र्वोदाहृतश्रुतीनां यथोक्तोपबृंहणवचनानुसारेणैव अर्थव
त्त्वं शक्यत्वात्। उदाहरणानि। हंसोपनिषदि। हृदब्जमध्ये लिं

गंधत्वाऽयोतिषिसंविशंति। असाध्यमस्याः परिमुच्यंतिस
र्वेलिंगांगशोभामोक्षमार्गैकनिष्ठाः तेब्रह्मलोकेषुपरांत।
कालेशिवप्रसादात्सरिमुच्यंतिसर्वे। लिंगांगसामरस्याच्च
शरीरेलिंगधारणात्। नियमेनैवधत्वातेमुक्ताःसंसारबं
धनात्। श्वेताश्वतरोपनिषदि। सर्वाननशिरोग्रीवस्सर्व।
भूतगुहाशयः। सर्वव्यापीचभगवांस्तस्मात्सर्वगतःशिवः
मनुस्मृतौ। सर्वकर्मविमुक्तस्यध्यानयोगरतस्यच। नत।
स्यदहनंकार्यंनचपिंडोदकक्रिया। शिवध्यानरतोभूत्वाशि
वलिंगांगसंयुतः। शिवेतरपरित्यागीध्यानयोगीसउच्यते। बो।

धायनस्मृतौ।सर्वसंगनिवृत्तस्यध्यानयोगरतस्यच।न
तस्यदहनंकुर्यान्नाशौचंनोदकक्रियां।ज्ञानातपस्मृतौ।
वानप्रस्थंयोगिनंचलिंगैक्यंभिक्षुकंयतिं।तुर्याश्रमाणां।
न्र मध्येचरसायांनिक्षिपेत् इति।पद्मपुराणे।कंठेषुहरंकंठादि
मुनयोमनवस्तथा।सर्वदाशिवलिंगंतुधारयंतियजंतिच।
शिवगीतायां।अशौपहासोभक्तश्चभूतिरुद्राक्षधारिणः।।
लिंगिनोयश्चविद्वेष्टितेवैनात्राधिकारिणः।शिवधर्मोत्तरे।
येयोगिनंद्विषंत्यज्ञाःसर्वपापेष्ववस्थिताः।येशिवज्ञाननिर
तंप्रद्विषंतीहयोगिनं।विकल्प्यंतेमहात्मानंयेमूढाःशिवलिं

गिनं। तेषां नित्रिपितृभिः सार्धं नरकेषु न संशयः। ब्रह्मांडपुरा
णे। पाणिनिश्च कणादश्च कपिलो गौतमादयः। प्रमादसे
वनाद्ध्यानादर्चनाद्धारणादपि। आनादर्शनकं नरिःश्रा
वयं तिजगत्त्रयं। लैंगे। अक्षपादादयस्सर्वे शक्रयःपर
यामुदा। धारयं स लिंगांगेषु शिवलिंगमहर्निशं। स्कांदे।
लिंगधारणमाख्यातं द्विधा सर्वार्थसाधकैः। बाह्यमाभ्यंतरं
चेति मुनिभिर्मोक्षकांक्षिभिः। आधारे हृदये वापि भ्रूमध्ये
वा निरंतरं। ज्योतिर्लिंगानुसंधानं नरदेवांतरमुच्यते। अंतर्धा
रयितुं लिंगमशक्तः शक्त एव वा। बाह्यं तु धारयेल्लिंगं तद्रूपमिति नि

अथातः। ब्रह्मविष्ण्वादयो देवा मुनयो गौतमादयः। धारयंति
सदा लिंगमुत्तमांगे विशेषतः। वातुलागमे। लिंगांगसंगं।
कुर्वंतं दृष्ट्वा द्विजवरं रविः। स्थानाच्चलत्ययं भिक्षामंडलं मे
व्रजेच्छिवं। तेषां संरक्षणं यस्तु कुरुते मनुजोत्तमः। स धन्यः
सकलतार्थस्यात्स शिवैक्यपदं व्रजेत्। तस्मात्सर्वं परित्यज्य सर्व
भावेन सर्वदा। पूजयेदादरेणैव द्विजं लिंगांगसंगिनं।
यः पूजयति लिंगांगध्यानासक्तधियं। पुनर्भवो न तस्या।।
स्ति सत्यं सत्यं मयोदितं। इत्यादिवचनप्रामाण्याल्लिंगधारण
रूपधर्मस्य वैदिकत्वं तदनुष्ठानवतां ब्राह्मण्यमपि सिद्धं।।

लिंगधारणस्य वैदिकधर्मत्व सिद्धावपि तदनुष्ठानवतां वीरशै
वानां ब्राह्मण्ये किंप्रमाणमित्याकांक्षायां। किमाहुर्भरतश्रे
ष्ठ विप्राः पात्रं सनातनं। लिंगिनं ब्राह्मणं चैव ब्राह्मणं चाप्यलिं
गिनं। इति युधिष्ठिरेण पृष्टे। सद्वृत्तिमपि विज्ञाय लिंगिने चै
नराय च। देयमाहुर्महाराज उभावेतौ तपस्विनौ। इति महाभा
रते अनुशासनिकपर्वणि भीष्मेणोक्तवान्। रुद्रेणात्तमश्नंति
रुद्रेण पीतं पिबंति रुद्रेणाघ्रातं जिघ्रंति तस्माद्ब्राह्मणाः प्रशांत
मनसो विद्वांसो निर्माल्यमेव भक्षयंति निर्माल्यमेवाश्नीयान्नि
र्माल्यमेव निषेवेत इति जाबालोपनिषदनुसारेण रुद्रभुक्तं तु भुंजी

यद्रुद्रपीतं पिबंति च यद्रुद्राघ्रातं सदा जिघ्रेदिति जाबालिकी श्रुतिः
शिष्टाः शांताश्च रुद्रेण भुक्तमेव हि भुंजते। घ्रातमेव हि जिघ्रं
ति पीतमेव पिबंति च। निर्विकल्पधिया शंभुभुक्तोच्छिष्टा
न्नपानकं। यो भुंक्ते स गणाधीशो यावज्जीवं प्रतिज्ञया। ततः
स्वयं च भुंजीयाच्छुद्धमन्नं यथासुखं। निवेदितं च देवायतन
दूषं चात्मशुद्धये। ये लिंगधारिणो लोके ये शिवैकपरायणाः
तेषां तु शिवनिर्माल्यमुचितं नान्यजंतुषु। स्वेष्टलिंगस्य यद्दत्तं च
रुकं तन्न संशयः। तस्मादश्येत्स्वयं प्राज्ञो नान्यस्मै न तु दापयेत्। अनि
वेद्यं तु भुंजानो नरो भवति किल्बिषी। पत्रं पुष्पं फलं तोयं मन्नपाना

यमौषधं। लिंगार्पितं विना भुंक्ते भुंक्ते स यो हि किल्मिषं। जिह्वा
चापलसंयुक्तः शिवसंस्कारवर्जितः। शिवप्रसादभोगीस्या
द्रौरवं नरकं ब्रजेत्। इति स्कांदे शैवसंहितादिषु श्रूयमाण
त्वात्। हं देवेषु ब्राह्मणोस्यहं मनुष्येषु ब्राह्मणः ब्राह्मणो वै ब्रा
ह्मणमुपधावस्वुपधावाम्युपताधावामितत्तो विप्रस्य संबंधः
शिवस्यैव हि युज्यते। संकरास्सर्वदेवाश्च वृषलस्तु पुरंदरः।।
पितामहश्च वैश्यस्या क्षत्रियः परमो हरिः। ब्राह्मणो भगवान्रु
वै द्रः सर्वेषामुत्तमोत्तमः। ब्रह्मभावो हि रुद्रस्य ब्राह्मण्यं नैव हेतुजं।
ब्राह्मणोसहालोके ब्राह्मणं चोपधावति। महाब्राह्मणमीशानमुप

ध्यावेन्नचेतरं । यो वै स्वां देवतामतियजते प्रस्वायै देवतायै
च्यवते न परां प्राप्नोति पापीयान्भवति । अस्यार्थः । कथ्यते ॥
विप्रो यस्तु स्वां देवतां शिवं अत्यतिक्रम्य यजते पूजयत्यन्यदे
वतां स हि प्रच्यवते स्वीयदेवतायै नराधमः । भूहापराधी ।
न परां प्राप्नोति गतिमुत्तमां । न गच्छत्यथ पापीयान् भवति पापी भ
वेद्ध्रुवं इत्युपब्रह्मणवचनपुरस्सरसामशाखायजुःश्रुत्यनु
सारेणैव पतिव्रतास्वभावेन विहायान्यत्तु दैवतं । शिवमेकं
भजेद्धन्यास्सर्वशांतिकरं परं । शिवभक्तो महातेजाः शिवभक्ति
परामुखान् । नस्पृशेन्नैव वीक्षेत न तैः सह वसेत्क्वचित् । स्व

मार्गाचारनिरतैस्सहवासं समाचरेत् । तेषां गृहेषु भुंजीत नते
तरेषां कदाचन । नार्चयेदन्यदेवांस्तु न स्मरेन्नच कीर्तयेत् । न
तन्नैवेद्यमश्नीयाच्छिवभक्तो दृढव्रतः । यद्गृहेष्वन्यदेवोस्ति
तद्गृहाणि परित्यजेत् । नान्यदेवार्चकान्मर्त्यान्पूजाकाले निरी
क्षयेत् । सदा शिवैकनिष्ठानां वीरशैवाध्ववर्तिनां । न हि स्थावर
लिंगानां निर्माल्यमुपयुज्यते । इति सुप्रभेदागमे प्रतिपादितत्वा
च्च । मुखे मंत्रो हृदि ध्यानं मस्तके लिंगधारणं । शिखारुद्राक्षभस्मा
नि इति ब्राह्मणलक्षणं । इति गौतमस्मृतिप्रामाण्याच्च शिवदीक्षा
भिज्ञातानां शिवप्रसादभोगिनां शिवैकपरायणानां लिंगधारणादि

षट्धर्मवर्तां वीरशैवानां ब्राह्मण्यं निष्कोटिकमेव भवतीति सिद्धं।
ननु ब्राह्मणसामान्यस्य यज्ञोपवीतं मुख्यं चिन्हं। खलु। तदभाव।
वतां वीरशैवानां कथं ब्राह्मण्यमित्यत्र ब्रूमः। यज्ञोपवीतं परमं पवि
त्रं एतत्सोमस्य सूर्यस्येति मंत्रद्वयमपि लिंगपरमेव। तथा हि यज्ञो।
वै विष्णुरिति श्रुतेः यज्ञस्य विष्णुनाम्नः पीठस्य उपसामीप्येन।
विविशेषणकृतं अवृतं यज्ञोपवीतं शिवलिंगमित्यर्थः। एकैव श
क्तिः परमेश्वरस्य भिन्ना चतुर्धा विनियोगकाले। भोगे भवानी
पुरुषेषु विष्णुः कोपे च काली समरेषु दुर्गा। इत्यागमिकोपदेशात्।
उमायास्सहरिः साक्षाद्यो हरिः सा शिवा स्मृतेत्यादि वचनात्। प्रकृति।

त्वं पुमान् रुद्र त्वयि तद्वीर्यमास्थितं। त्वन्नाभिपंकजाज्जातः पंच
वक्त्रः पितामहः। इति ब्रह्मांडपुराणे। त्वं चंद्रमा अहं सूर्यः शर्वरी।
त्वमहं दिवेति आदित्यपुराणे च। विष्णोः शिवशक्तित्वं सर्वदेशा
नु। शिवस्य शक्तिपीठवत्तन्मध्यलैंगे षोडशाध्याये। लोकाश्रय।
त्रतिष्ठंति सूत्रे मणिगणा इव। तत्सूत्रमिति विज्ञेयं रूपमच्युत।
मेश्वरमिसुक्तत्वात्। कारणागमे। तदाहूय मुनीन्द्र दृष्ट्वा भज।
ध्वं मुनिपुंगवाः। भस्मरुद्राक्षलिं[illegible]नास्फाटिकं शैलजं तु वा शि
वविष्णुमयं लिंगं त्रिवृत्सूत्रं सनातनं। यज्ञोपवीतं परमं पवित्रं भ
धयासह। कराब्जपीठे पीठे वा भजध्वं श्रुतिकोविदाः। त्रयः सू

लसूक्ष्मकारणाभिमानिनोविश्वादयोजीवाः। तज्जीवांतःपरमा
त्मानः इष्टलिंगप्राणलिंगभावलिंगाख्याचरणानियस्य।
तत्सूत्रंमणिगणसूत्रवत्सर्वव्यापकंत्रिवृत्सूत्रंज्योतिर्मयंमहा॥
लिंगमित्यर्थः। इत्युक्त्वाभगवान्ब्रह्मासमस्तलोकमगच्छत्संस्थि।
तत्वाप्तसमस्तेषुवस्तुष्वपिचसंततं। सूचनात्सर्वमेशस्यसूत्रलिंग
मितीरितं। यदक्षरंपरब्रह्मतत्सूत्रमितिधारयेत्। धारणादस्य
सूत्रस्यनोच्छिष्टंनाशुचिर्भवेदितिप्रकाशेनोक्तत्वात्। यजुरप्या
हसर्वंवैलिंगंस्थापयतीतिचतस्माद्धार्यंमहालिंगंपाणिमंत्रेति।
मंत्रतः। पाणौलिंगंविनिक्षिप्यदीक्षाकालेगुरुःशिवं। येनस्तुवति

ननु वीरशैवानां यज्ञोपवीतवत्वेपि पंचयज्ञसंध्यावंदना
दिवैदिकैर्मानुष्ठानवत्वाभावात्कथं ब्राह्मण्यं सिध्यती
ति चेन्न। सुभंप्रदागमे। विप्रशुद्धाः प्राक्तनाश्चेति द्वि
विधा मानुषास्मृताः। शिवसंस्कारिणः शुद्धाः प्राक्तना
इतरे जनाः। वर्णाश्रमादिधर्माणां व्यवस्था हि द्विधाम
ता। एका शिवेन निर्दिष्टा ब्रह्मणा कथिता परा। शिवधर्मो
हि कथितः शिवाश्रमनिषेविणां। शिवसंस्कारहीनानां
धर्मः पैतामहः स्मृतः। सोयं धर्मसंग्रहेण प्रोच्यते नाति
विस्तरं इत्युपक्रम्य। तपः कर्म जपो ध्यानं ज्ञानं चेत्यानुपूर्वं

कं। शिवार्थे देहसंशोषस्तपः कृच्छ्रादिनोमतं। शिवार्चाक
र्मविज्ञेयं बाह्यं यागादिनोच्यते। जपः पंचाक्षराभ्यासः
प्रणवाभ्यास एव वा। रुद्राध्यायादिकाभ्यासोनचेतदध्य
यनादिकं। ध्यानं शिवस्य रूपादिचिंतनात्मादिचिंतनं।।
शिवागमार्थविज्ञानं ज्ञानं नान्यार्थवेदनं। इति पंचप्रका
रोयं शिवयज्ञः प्रकीर्तितः। अनेन पंचयज्ञेन यः पूजयति
शंकरं। भक्त्या परमया युक्तस्स वै भक्त इति स्मृतः। अंतः
प्रकाशमानस्य संविसर्पस्य संततं। मनसा यदुपस्थानं तत्सं
ध्यावंदनं विदुः। सत्यंक्षमा दया शौचं नियमो मार्दवं तथा।

तपस्सागोब्रह्मचर्यंसंतुष्टिश्चार्जवं तथा। धर्मादशकादेशा
प्रोक्ता भक्तानां शुभवांछने। लिंगार्चनादिकं कर्मका
र्यं दीक्षान्वितैर्नरैः। इति शिवार्चनादीनामेव पंचयज्ञ
संध्यावंदनादि कर्त्तव्येनोक्तत्वात्। तथापि। ब्राह्मणाऋषि
गोत्रा इति व्यवहारे तद्भाववतां वीरशैवानां कुतो
वा ब्राह्मण्यमिति चेन्नवाच्यं। यदायदा हि धर्मस्य हानि
र्भवति भूतले। तदा तदाव तारोयं गणेशानां महीतले।
यदा यदा प्राणशिवैक्यभाजो हानिर्भवे द्भूमिगते गणेशाः। त
दा तदा मर्त्यकुले वतीर्य संभूय कुर्वंति हि धर्मसंस्थां। इति शां

करसंहितावचनानुसारेण अतःपरं प्रवक्ष्यामि पंचाचार्यसमुद्भवं तेषां नामानि देवि हं श्रृणु निश्चलचेतसा। घंटाकर्णगणश्चाद्यो गजकर्णो द्वितीयकः। तृतीयो रेणुकः ख्यातो चतुर्थो दारुकस्तथा। पंचमो विश्वकर्णश्च पंचाराध्या इति स्मृताः। त एव युगभेदेन प्रतिनामान्युपागताः। एकाक्षरो द्व्यक्षरश्च त्र्यक्षरश्चतुरक्षरः। पंचाक्षर इति ख्याताः कृतायां मेनकात्मज। द्वापरे चैकवक्त्रश्च द्विमुखस्त्रिमुखस्तथा। चतुर्मुखः पंचमुखश्चेति ते विश्रुता गणाः॥ एकोरामः पंडितार्यस्तथा रेवणसिद्धराट्। तथा मरुळसिद्धे

ज्ञो विश्वाराध्य इति क्रमात्। भवितारः प्रवक्ष्यामि श्रृणु तज्ज
नन क्रमं। द्राक्षारामेरामनाथ लिंगे युगचतुष्टये। एकोराद
मस्य जननं आवासस्तु हिमालये। सुधाकुंडाख्य सुक्षेत्रे
लिंगे श्रीमल्लिकार्जुने। जननं पंडिताचार्यस्य निवासः श्रीगि
रौ शिवे। तथा रेवण सिद्धस्य कोल्लीपाकी पुरोत्तमे। सोमेश
लिंगे जननमावासः कदलीपुरे। तद्वन्मरुळसिद्धस्य व
टक्षेत्रेमहत्तरे। सिद्धेश लिंगे जननं स्थानमुज्जयिनी पु
रे। काश्यां विश्वेश्वरे लिंगे विश्वाराध्यस्य संभवः। स्थानं
श्रीकाशिकाक्षेत्रे शृणु पार्वति सादरं। स्वनाद्युगचतुष्केते

१ [illegible]राध्यायथाविधि। ममपंचमुखोद्भूतास्तांस्थापयक
लज्ञानभुवि। दीक्षांस्कन्दक्रमादेवंपंचमानांनगात्मजे।
कलौतद्वंशजातानांदीक्षानुग्रहकारणात्। निधायलिङ्ग
शिष्यांश्चपुनस्तेमांसमागताः। इत्यादिनापंचाचार्यावत
रणस्यतच्छिष्यगोत्रसूत्रप्रवरादीनांचस्वायंभुवागमे।
घंटाघोषमुक्तत्वात्। इदानीमपितेषांपीठपंचकस्यहिमाल
यादिषुप्रसिद्धतयास्थितत्वाच्च। ब्राह्मणोस्यमुखमासी
दितिब्राह्मणपदवाच्यशिवमुखोद्भूतेषुघंटाकर्णादिष्वा
चार्येषुब्राह्मण्यस्यनिसर्गसिद्धत्वाच्चतद्वंशीयानामपिब्रा

स्मण्यं स्थिरमेवेत्यलं प्रणिबंधबंधकं कणदर्शनस्यादर्शान्वे
षणेन। अथैवमपि। जन्मना जायते शूद्रः कर्मणा जायते द्वि-
जः वेदाभ्यासेन विप्रः स्याद् ब्रह्म विद्ब्राह्मणो भवेदि-
ति महाभारतवचनाद्वीरशैवानां तद्भाववत्त्वाद्विजत्ववे
दाधिकारित्वादिकं कथं युज्यत इति चेन्न तेषामवश्यक-
र्तव्याया शिवदीक्षायाः रुद्रो भूत्वा यजेद्रुद्रं नारुद्रो रुद्र-
मर्चयेदिति प्रमाण परिप्राप्त रुद्राराधनयोग्यताफलक-
पूर्वनिष्ठजीवत्व निरासपूर्वक शिवत्व प्रतिष्ठापन प्रयोज-
कत्वात्तया शिवदीक्षासंस्कारवतामुपनयनं विनापि-

तेषां तद्बलेनैव हि जन्मदारास्तदध्ययनस्तदादिधानेष्वधि
कारित्वसिद्धेश्च। तथा हि गारुडपुराणे। वंशावलिप्रया
तानां लिंगधारणशालिनां जातिनां शिवभक्तानां शू
द्रत्वं नैव विद्यते। नमके चमके पंचब्रह्ममंत्रादि वैदिके।
तेषामेवाधिकारोस्ति शिवदीक्षाप्रभावतः। इति वस्तुतः
स्तु अलिंगिब्राह्मणकुमारस्य अनुपनीतस्य शूद्रत्वं वीर
शैवकुमारस्य अनुपनीतस्यापि ब्राह्मण्यमिति परमार्थः। पा
रमेश्वरागमे। दीयते लिंगसंबंधः क्षीयते च मलत्रयं। दीय
ते क्षीयते यस्मात्तस्माद्दीक्षेति कथ्यते। गर्भाष्टमेब्दे तां मुखा

दीक्षासाषोडशावधिः। गौणान दूर्ध्वमधमादीक्षावीरान्नवा ः
दीक्षायिनां इति कालं निरूप्य कुंडमंडपहोमाद्यैन्यासैरध्वकला
दिभिः। मंत्रोपदेशसहिता क्रियादीक्षेति गीयते इ सारभ्यक्ष
ध्वं पुण्याहनांदीसमाराधनअंकुरार्पणमंडपदेवताप्रति
ष्ठापंचब्रह्मकलशार्चनहोमषडध्वशोधनधान्याधिवा
सजलाधिवासपंचगव्यप्राशनषट्त्रिंशत्कलान्यासरू ः
पांगसंस्कारलिंगसंस्कारपूर्वकाज्ञादुपमास्वस्तिकारोह
णकलशाभिषेकविभूतिपट्टलिंगायतनलिंगस्वाय ः
नारम्भसमविधदीक्षाविधानस्यवातुलागमादिषूक्तत्वात्तः

स्वकारकदीक्षैवास्माकं। संप्रदायसिद्धतयाप्रतिभाति। नस
र्वं विस्तरभयान्नलिखितं। तथाच अष्टावरणसंपन्नः पं
चाचारपरायणः। वैदिकं कर्मकुर्वीत ज्ञानैकफलसाधः
नं। शिवभक्तोपि विप्रोपि वेदाध्यायपरायणः। स एव शिवर
मुक्तस्स्यात्समेवनसंशयः। अदीक्षितानां विप्राणां शिवागम
विलोकनं। पापमेतन्महादेविसत्यमेवनसंशयः। इतिवी
रागमादिवचनप्रामाण्याच्च। भूतिरुद्राक्षसंयुक्तः लिंग
धारीसदाशुचिः। पञ्चाक्षरजपन्योगी शिवभक्तइतिः
स्मृतः। इतिसिद्धांतशिखामणिवचनप्रामाण्याच्च शि

वदीक्षाभिआतानांशिवैकभक्तानांवीरशैवानांशिवप्र
तिपादकवेदागमाध्ययनज्ञानैकफलसाधनवैदिक
कर्मानुष्ठानअधिकारित्वंस्पष्टं।ननुशैवस्यैवस्मार्ता।
दिषुप्रसिधत्वाद्वीरशैवमतंकुतआयातमिति-चेन्न
तस्यपुराणागमप्रतिपादितत्वात्।अं-चारभेदशैव
स्यभेदस्संकथ्यतेधुना।सामान्यशैवंप्रथमंमिश्रशैवं
ततःपरं।शुधशैवंतथाक्षेयंवीरशैवंततःपरं।एतेषांल
क्षणंवक्ष्येशृणुदेवियथाक्रमं।सामान्यभेदःपूजादि

सिवस्यपरमात्मनः। सर्वत्र शिवभावश्च सामान्यमिति गीयते। यदायदा शिवंपश्येत्तदा कुर्याछ्रिवो [illegible]। प्रदक्षिणनमस्कारौदर्शनंवासमाचरेत्। शिवचिन्हेषुभक्तेषु शिवकार्येषुपार्वति। भक्तिंकुर्वीतसततंमनोवाक्काय कर्मभिः। सामान्यशैवमाख्यातंमिश्रशैवमतःशृणु शिवंविघ्नंचब्रह्माणंकुमारंगणनायकं। आदिममंबिकांचैवमिश्रीकृत्यसमर्पणं। सर्वत्रदैवतानांबुधिर्माहात्म्यंशिवएवबा। शिवधर्मान्यधर्माणांसमाचरणमादरात्।। अन्यपूजामिश्रितत्वान्मिश्रशैवमुदाहृतं। अतःपरंशृ

द्धशैवं वक्ष्यामि शृणु पार्वति। शुद्धशैवमिति प्रोक्तं तन्म-
वं शैवमुच्यते। एक एव महादेवस्सांबस्सत्यादिलक्ष-
णः। तदन्यदेवास्तद्भक्तास्तद्भूतास्तदाश्रिताः। लिं-
गस्य पूजावेलायां ये चान्ये देवसत्तमाः। तेषामावरणे-
न पूजां स्नानं चान्यथा। गुरुणादत्तलिंगं तु करपीठे वि-
धाय जेत्। गुरूपदिष्टनियमां स्नानं ध्यानं समाचरेत्।
प्रमादात्पतिते लिंगे नष्टे दग्धे हृते पि वा। विनिर्गते तदा-
पीठाद्येन केन च दूषिते। गुरुपादांबुजं स्मृत्वा जप्त्वा घोरं त-
दाज्ञया। तल्लिंगमेव वान्यद्वा धारयेत्पूजयेत्पुनः। प्रमादा-

न्नियमेनतुतेमूलपंचाक्षरीं जपेत्। प्रायश्चित्तमिदं देवि व्र
तस्यानादिलोपने। शृणु शैवमितिप्रोक्तं वीरशैवमतं
शृणु। सर्वेषामपि शैवानां वीरशैवं महत्तरं। सुलभादे
वपूजा च सुलभं च क्रियावहं। अल्पक्रियं बहुफलं वी
रशैवं महेश्वरि। अन्येषामपि शैवानां मुक्तिर्जन्मत्रये
प च। अन्यशैवं तु तत्सर्वं फलाल्पं च क्रियाबहु। वेदांत
अल्पं [illegible] यत्स्थानं विद्येति परिगीयते। विद्यायां र
मते तस्माद्वीर इत्यभिधीयते। एक एवायमेतस्मिन्स
र्वस्मिन् जगतीत्रये। विशिष्यते यस्माद्वीर इत्यभिधी

तेकेनजन्मनामुक्तिवीराणांतुमहे
यते

यते। वीरशैवलक्षणं तु। यो हस्तपीठे निजलिंगमिष्टं वि
न्यस्य तल्लीनमनःप्रचारः। बाह्यक्रियासंकुलनिस्पृ
हात्मा संपूजयत्यंग स वीरशैवः। अत्र निजेष्टलिंगमि
ति। सा कला परमा सूक्ष्मा तहानां बोधिनी परा। ता
मारूप्यथान्यायं लिंगे समुपवेशयेत्। इत्यागमवा
क्यात्। स्वनाभिहृदयकंठभ्रूमध्यब्रह्मरंध्रेषु दिमस्था
नेषु स्थितं ब्रह्मशिवरुद्रादिसंज्ञिकं परमात्मरूपलिंगमे
व श्रीगुरुणा विधिवदुपसन्नाय सच्छिष्याय वीरशैवाय पूः
र्वोक्तप्रकारेण करपीठे प्रतिष्ठितं तल्लिंगं वीरशैवस्य स्वीयः

प्राणलिंगंस्थावरलिंगमनुपदिष्टत्वात् । परकीयं तस्माद
नुपदिष्टस्थावरलिंगपूजाभावेऽसमर्थं भिन्नमिति विशेष
णं कृतं तस्माद्गुरूपदिष्टप्राणलिंगादन्यलिंगस्य पूजनं
वीरशैवैर्न कर्तव्यमित्यर्थः । बाह्यक्रियासंकुलमिस्तृता
मेति तत्रैव करपीठकथनाध्याये सिंहासनेभ्युपदेशेसु
रम्येरलंचित्रिते । शिवलिंगस्य पूजायामासबाह्याभक्तिः
रुच्यते । लिंगे प्राणं समाधाय प्राणे लिंगं तु शांभवं । स्वशरी
रं मनः स्वस्थानं किंचिच्चिंतयेद्धृदि । साभ्यंतराभक्ति
रिति प्रोच्यते शिवयोगिभिः । इत्युक्तत्वात् । बाह्यभक्तो

ह्वासनपूजायांकारिताः याः क्रियाः आत्मशुद्धिस्थानशुद्धि
द्रव्यशुद्धिमंत्रशुद्धिलिंगशुद्धिशोषणदाहनप्लावनांग
न्यासाह्वानविसर्जननासिकाग्रहणरेचकपूरककुंभकः
प्राणायामजठराकुंचनप्राचीवीक्षणमौनमुद्रादिगुल्मी
लनादिकाः बाह्यक्रियाः तासांसंकुलंतस्मान्निस्पृहात्मा
निवृत्तचित्तः सन्संपूजयतिसम्यक्पूजयतीत्यर्थः। पू
जायास्समीचीनत्वंकथमितिचेदुच्यते। मनएवमनु
ष्याणांकारणंबंधमोक्षयोः। यथाचालिंगितः पुत्रस्त
थाचालिंगितः पतिरितिवचनादंतराराधनमेवाल

मितिकेचनवदंति। गवांसर्पिः शरीरस्थं नकरोत्यात्मपोषणं। निस्सृतं कर्मरचितं पुनस्तासां तु भेषजं। एवमंतः शरीरस्थस्सर्पिवत्परमेश्वरः विनाचोपासनां देवो नकरोति हितं नृणां। इति वचनाद्बाह्याराधनमेवालमितिकेचनवदंति। तस्माल्लिंगपूजनं तथैकविधमेवन भवति। किंतु बाह्ये आंतरदवस्थायामनुभूतार्थ एव हि अंतस्स्व प्रदर्शयां तु यथेहृपरिदृश्यते। तथांतर्यजनं निसंबहिर्यजनपूर्वकं। बहिर्यागविहीनस्थ्येदंतर्यागोन सिध्यति। तद्बाह्यांगेचांतरंगेपरमप्रीतिपूर्वकं। कर्तव्यं स्वेष्टलिंगस्यचों[illegible]तचने

न्मनीषिभिः। इत्यागमवचनाच्छिवरहस्ये। इष्टलिंगं प्राणलिं
गमेकीकृत्य समर्पयेत्। मणिमालां मंत्रमालामेकीकृत्यज
पेत्सदा। मातृका प्राणलिंगस्य मणिमालेष्टरूपिणः। इत्युक्तः इ
ष्टा ह्याभ्यांतरयोरिष्टलिंगप्राणलिंगयोरर्चनं वीरशैवैः कर्त
र्तव्यं। तस्मादिष्टलिंगार्चनपुरस्सरं प्राणलिंगपूजनेकृतेस
ति तत्पूजनमेव सम्यक्पूजनं। तथा पूजयितारः वीरशैवा
इत्यर्थः। शंकरसंहितायामुपरिभागे। तदेवहस्तांबुजपी
ठमध्ये निधाय लिंगं परमात्मचिन्हं। समर्चयेदेकधियोपः
चारैरंतरस्तु बाह्यांतर भेदभिन्नैरिष्टकृतान्। तत्रैव करपीठ

कथनाध्यायेशिष्यंप्रतिगुरोर्वाक्यं। वक्ष्ये लिंगार्चनं नित्यं
त्रिकालं कुरु भक्तितः। पूजाद्रव्याणि संशोध्य शुचिस्नातोनरः
मानसः। कुरुष्व वक्ष्योपचारान् षोडशस्नानपूर्वकान्। बा
ह्यांस्तथाभ्यंतरांश्च समाहितमनास्सदा। स्नानं शुचिसस
लिलेन हि पूर्णभाववस्त्रं त्रिशक्तिगुणसंयुतयज्ञसूत्रं विद्या
नुगंधमिवभूतदयाक्षतांश्च ज्ञानादिपुष्पचयमर्पयलि
समंग। प्रणामसन्तोहं कनिचिनधूपंश्रोत्रादिपंचेंद्रियदीप
जालं। तद्वासनातैलयुतं चदेहि जीवोपहारं सुखदुःखवाद्यं।
गुणत्रयारात्रिकतांबूलं प्राणार्पणनमस्कृतिं। शांतिपुष्पांजलिं दे
हि चैकभावविसर्जनं। एवमाभ्यंतरद्रव्यसंभृतं शिवपूजनं।

कृत्वा निधेहि सततं लिंगं वस्त्रेण वेष्टितं। मस्तके कंधरे कक्षे
वक्षस्यथ करस्थले। नाभेरधस्तात्सततं प्रमादान्नैव धार-
येत्। लिंगं तु त्रिविधं प्रोक्तं स्थूलं सूक्ष्मं परात्परं। इष्टलिंगमि-
दं स्थूलं यद्बहिर्धारयेत्तनौ। प्राणलिंगं तु यत्सूक्ष्मं तद्धृतं भाव-
नामयं। परात्परं तु यत्प्रोक्तं तृप्तिलिंगं तदुच्यते। इष्टलिंगमिदं
साक्षादनिष्टपरिहारकं। धारयेदवधानेन शरीरे सर्वदा बुधः
बाह्यपीठार्चनादेतत्करपीठार्चनं परं। सर्वेषां वीरशैवानां मु- व
मुक्षूणां निरंतरमियुक्तत्वाच्च वीरशैवेषु ब्राह्मण्यं वैदृम-
वादिषु समानाधिकरण्येन प्रतिभाति। तथा च स्कांदे।
क्रिमिकीटपतंगेभ्यः पशवः प्रज्ञयाधिकाः। पशुभ्योपि नराः
श्रेष्ठास्तेषु श्रेष्ठा द्विजातयः। द्विजातिष्वधिका विप्रा विप्रेषु क्रे-

तुष्टुधयः। ऋत्वृत्विक्षु कर्तारस्तेभ्यः सन्यासिनोऽधिकाः तेभ्यो
विज्ञानिनः श्रेष्ठास्तेषु शांकरपूजकाः। तेषु श्रेष्ठा महाभाग
मम लिंगांगसंगिनः। लिंगांगसंगिष्वधिकः षट्स्थलज्ञान
वान्पुमान्। स एवं घस्सर्वैरापूज्यस्संसारविजिगीषुभिः।
वक्तुं नोक्तेन किं वक्ष्यामि वाहं न संशयः। इत्युक्तत्वात्। अष्टा
दशानां वर्णानां श्रेष्ठो माहेश्वरो जनः। इत्यादिवचनप्रामा
ण्य प्राणिवर्णान्तरं तस्यैपि माहेश्वरादिपदवाच्यानां वीरशै
वानामेव वर्णोत्कृष्टत्वं निर्णीतं भवति। ननु शंकराचार्यादि
भिः ब्रह्मसूत्राण्यवलंब्य कृतानां अद्वैतादिसिद्धांतस्थाप
कानां भाष्यादीनां शैवादिषु विद्यमानत्वात्ते षामेव ब्रा

सण्यमूर्त्तितंवीरशैवमतावलंबिनां सिद्धांतस्य निरालंबत्व
कथंवक्ष्यामि इति चेन्न। अथाभिधास्ये वीराणां शैवानां वे
दमूलतां। आसननिर्मितसूत्रार्थं तन्नामसर्यानुसारतः। विशब्दे
नोच्यते विद्या शिवजीवैक्यबोधिनी। तस्यां रमंते ये शैवावी
रशैवाइतिस्मृताः। विशब्दोवा विकल्पार्थोरशब्दोरहितार्थ
र्थकः। विकल्परहितं शैवं वीरशैवं प्रचक्षते। तत्रापि तत्
स्य वाक्योक्त लिंगधारणवैभवे। लिंगांगसामरस्यं च फ
लं मोक्षं प्रचक्षते। पिंडादिज्ञानशून्यांतमेकोत्तरशतस्थलं
षट्स्थलं लिंगभेदं च जिज्ञासुर्भक्तिपूर्वकं। अधिकारी
सविशेयस्सकसर्वैषणस्स्वयं। अष्टांगयोगवान्ज्ञाः

नीपंचाचारपरायणः। भक्तमाहात्म्यशुश्रूषुश्चिर्कीर्षुर्मो
क्षसाधनं। गुरुशिश्रूषणरतः श्रुतवान्वीतकल्मषः।
नगुरोरस्तिशीमानानगुरोरस्तिशः पिता। संसाराब्धुद्धरेद्यो
हिपरमार्थोपदेशतः। गुरूपसदनादेवब्रह्मविष्ण्वादयस्सु
राः। लिंगांगसामरस्यंचप्रापुर्युविगतज्वराः। सनत्कुमारप्र
मुखाज्ञाननिष्ठायशस्विनः। ध्रुतलिंगांगभावाश्च विराज
न्तेनिशंमुदा। तुंडिनंदिमहाकालिप्रमुखागणनायकाः॥
चतुर्दशसहस्राणि कैलासावरणाधिपाः। मतप्रवर्त्तकाः
सर्वेगुरुपीठाधिरोहिणः। महेश्वरसमीपेतेवर्ततेभ्रूलण
णयः। अगस्त्योजैमिनिश्चैवविश्वामित्रोथकाश्यपः। भर

दधीचोगिरा अत्रिर्वसिष्ठो रोमहर्षणः। एते सर्वे महाभागा अ
ति वर्णाश्रमेरताः। वीरशैवाः समाख्याता जीवन्मुक्ता न संशयः
येषां तु जन्म-चरमं तेषामत्रमतिर्भवेत्। ते धन्यास्ते कुलीऽ
नाश्च शिवज्ञानप्रवर्तकाः। एते सर्वे षु लोकेषु सर्वे धर्माः प्र
वर्तिकाः। शिव एव हि सर्वेषां गुरुराद्यः परात्परः। कालेन व्या
नवच्छेदात् स पूर्वेषां गुरुः शिवः। तन्मुखाद्गलिता वेदाः कामि
काद्याश्च संहिताः। अन्याश्च विविधा विद्यास्तत्तत्कर्मप्रदर्श
काः। तत्र दीक्षां गतो मासमस्तत्त्वज्ञानैकतत्परः। पशुपाशपति
ज्ञानं लब्ध्वा वां छिवभक्तितः। शिवज्ञानानि दिव्यानि मोक्षैकः

नि

फलदान्यपि। शिवेनैवोपदिष्टानि तेन तानि क्तानि च॥
धृ ततः कृतानि सूत्राणि तेन तत्त्वपराणि हि। तेषामर्थश्च न
स्पष्टः सद्गुरोरप्यदर्शनात्। बहुधोल्लेखिता अर्थास्तर्कैः
कर्कशभाषणैः। यदैक्यं ज्ञानशास्त्रार्थो जीवात्मपरमात्म
नोः। मिथ्यात्वं जगतोऽज्ञौ सर्वभ्रान्तिवदिष्यते। अविद्या
वद्विषयता शास्त्राणामिति केचन। ब्रह्मज्ञानैकनाश्यं हि
प्रारब्धं कर्मजं फलं। इति केचिद्वर्णयन्ति केचिदन्यत्प्रचक्ष
ते। जीवात्मा परमात्मा च द्वौ पदार्थौ व्यवस्थितौ। सत्यत्वं ब्रह्म
णः साक्षादनित्यत्वं विकारजं। प्रपंचस्य तथा सर्वसाक्षित्वं पर
मेशितुः। प्रधानतोपासनस्य मुक्तिसालोक्यनामिकादिमं

गलरूपंचपरस्य ब्रह्मणोस्ति हि। एवं मतानि बहुशो भुवि वि
स्तरितान्यपि। समुपेक्षत तत्सर्वं प्रार्थयामास शंकरं। मता
नि विविधान्येव समुत्पन्नानि शंकर। अकृतानां च सूत्राणाम
यथानयनं सतं। एवमेवेति निश्चित्य कुर्वंति कलहं मिथः॥
स्य ब्रह्मसादात् एकलक्ष्यं सूत्रजालस्य शंकर। यथापूर्वं स्वयाका
र्यं मत्सूत्रार्थविवेचनं। इतितेन प्रार्थितः सन् दयालुः पा
र्वतीपतिः। नीलकंठशिवाचार्यनाम्ना भाष्यमचीकरत्।
विशिष्टाद्वैतसिद्धांतप्रतिपादनमुत्तमं। मयापि तस्य तात्पर्यं
श्रोतॄणां सुखबुद्धये। कारिकारूपतः सर्वं क्रमेणैव निबध्यते।
उपक्रम्य। लिंगांगसामरस्यैकलक्ष्यं पाशविमोचनं। शिवएः

वपरंतत्वंशिवएवपरंमहः शिवएवपरंज्योतिःशिवएवपरा
त्परः। व्यासोक्तंयत्परंब्रह्मसूत्रेषुसशिवस्स्वयं। शिवएवहिलिं
गंतुलिंगरूपीशिवस्स्वयं। सर्वतत्वावलंबश्चजगत्कारणमव्य
यः। तत्त्वंदस्यादिवाक्यार्थःस्वरूपोनिष्कलःस्वयं। एवंब्रह्म
द्वितीयंचसत्यंज्ञानसुखात्मकं। निर्गुणंनिर्मलंशुद्धंजनिः
मारव्यंनिरंजनं। देवानामादिभूतश्चरुद्रोविश्वाधिकःप्र
भुः। सर्वज्ञःसर्वकर्ताचसर्वकारणमीश्वरः। अनादिनि
धनंवस्तुपरापरविहीनकं। परमात्मस्वरूपंचपरब्रह्म
स्वरूपकं। निष्ठाप्राप्यंपरंतत्वमप्रमेयमनूपमं। कथयं
तीतिवेदांताःशिवंपरमकारणं। महालिंगस्वरूपोयंशंक

च

त्वम

रःसमस्तशिवः। इति आनंदनिये भक्ताः गुरोः कारुण्यतः शिवं
शोकात्तरंतितेसर्वे महादेवप्रसादतः। सर्ववेदांतसारं हि
चिदंबरसमन्वितं। पूजयेद्धृदयाकाशेस्वात्मनो हितमात्म
नं। प्रकाराबहवो लोके दहरोपासनादयः। सानुकार्या वीरशै
वैर्गर्भदीक्षादिसंस्कृतैः। लिंगांगसामरस्येन शिवभावसमन्वि
तैः। कालयोरागमार्थानुसारेणातिसमाहितैः। स्फुटीभवित्यति
स्थूलसूक्ष्ममध्यमभेदतः। त्रिविधा शिवपूजापि चोपदेशेच
तुर्दशे। साचपूजाहस्तपीठे मुख्यान्यत्रापि केचन। तन्मात्रेणैव
संतुष्टः शंभुर्निःश्रेयसःप्रदः। तस्यापिमूर्तयःसंतिपंचविंश
तिसंख्यया। ताभ्यःकुर्वन्तुलिंगस्यपूजनं भक्तिपूर्वकं। विष्ण्वा

३

दयःसुरगणायक्षरक्षोगणास्तथा।जन्मकर्मनिवृत्त्यर्थंमुने
योधृतनिश्चयाः।उपासतेमहालिंगंबहवोमोक्षणार्थिनः॥
नित्यापरोक्षविज्ञानंचिद्घनानंदरूपिणं।लिंगंचअनिमं
नित्यं चित्रंअनंतंब्रह्मेडितंपरं।सत्संज्ञानंसुखंदीप्यंवाध्यकंरूप
णंश्रुतं।एवमादीनिनामानिसंतिलिंगस्यभूरिशः।त
ल्लिंगमेवसूत्रेषुआसेनापिविचारितं।नीलकंठशिवाचा
र्यैस्तत्तासर्वंप्रकाशितं।कलिकल्मषनिर्धूतनवबुधिभि
रन्यथा।नीतंयथातथंशास्त्रंसद्गुरोरप्यदर्शनात्।आमाल्य
यपरिप्राप्तमतिकौशलशालिभिः।विश्राममनीयत्तवाथ
कथ्यतेथयथातथा।अथातोब्रह्मजिज्ञासेतस्मिन्सूत्रेयदी

रितं। तद्ब्रह्म केवलं लिंगं ज्ञातव्यं च मुमुक्षुभिः। समनंतरसूत्रे
षु तद्गुणा एव वर्णिताः। अनंतर्येऽथ शब्दस्य पूर्वकांडानुरो
धतः। किमनंतरमित्युक्ते वाच्यं धर्मविचारतः। अनंत
र्यं विचार्यस्य ब्रह्मणो लिंगरूपिणः। ॐकारश्चाथ शब्दश्च
द्वावेतौ ब्रह्मणः पुरा। कंठं भित्वा विनिर्यातौ तस्मान्मां
गलिकावुभौ। इति प्रमाणतस्तत्र मंगलार्थो नयुज्यते।। पू
पं र्वकांडविरोधेनं गांगित्व निरूपणात्। ब्रह्मणो लिंगरूपित्वं
नयुक्तमिति चेच्छृणु। आम्नायनमआरभ्य लिंगशब्दपरः
परा। प्रसिद्धत्तैत्तरीयोपनिषद्येव प्रदृश्यते। लिंगशब्दस्य
नान्योऽर्थः कल्प्यस्त्वरसतः श्रुतेः। आसमेहेनमस्कारः तदुक्त
ने

ष्टनमस्कृतिः। ततऽस्यर्थसांगत्यं ब्रह्मणो लिंगरूपतः। अनंतर
नमस्कारः कथं संगछते न्यथा। तस्माल्लिंगपदस्यार्थे ब्रह्म
नित्यं निरंजनं। पूर्वकांडप्रसिद्धस्तु धर्मोऽग्निष्टोमपूर्वकः
वीरशैवादिनैवेति चानंतर्यं कथं भवेत्। वेदोक्तभूतिरु
द्राक्षलिंगधारणकर्मठैः। विचार्यं ब्रह्मलिंगाख्यं नानंत
र्यं विरुध्यते। पूर्वकांडविरुद्धोर्थः पूर्वकांडे कउच्यते। पूर्व
कांडीयधर्मस्य यावद्य क्किंचिदेव वा। सतोपनंस्याश्रुवेदांते यत्न
नुप्रवेशनात्। यावतां कर्मणां केनाप्यनुष्ठातुं न शक्यते। अ
तो यत्किंचिदेवात्र विवक्षितमुदीर्यते। चतुर्णां साधनानां तु
संपत्तेः समनंतरं। इति केचिद्वदंति तन्नातीवोपयुज्यते। ६

हामुत्र फले भोग विरागः शमशालिता। वेदांतार्थ विचारैकल
भ्यत्वादधिकारितां। नसंपादयतीयत्र धर्मानंतर्यमुच्यते।
चतुःसाधनसंपत्तिः समनंतरमेव चेत्। तत्त्वज्ञात्प्राश्वल क्ष
स्य जिज्ञासा न भवेत् क्वचित्। धर्मानंतर्यमेवातो वाच्यं ध
र्मो द्विधा मतः। पक्षुधर्मः प्राथमिकोऽपतिधर्मो द्वितीयकः॥
अनुतिष्ठन्प्रज्ञो धर्मान्पतिधर्मानमर्हति। यथा पिपीलि
का वृक्षमूलमाघ्रायतत्फलं। आरुह्य लभतेतद्वत् पतिधर्मैः
कृतस्सरः। यथा विहंगः पक्षाभ्यां फलितं वृक्षमागतः। पश्यः
न फलमवाप्नोति तद्वद्धीघ्रं नदर्हति। यन्निसमपरोक्षं चऽ
ज्ञानं मोक्षैकसाधनं। पक्षुधर्म इति प्राहुर्यस्तु काम्यफलप्रदः॥

निष्कामेन स्वपापस्य विशुद्ध्यै समनुष्ठितः । यो धर्मः स्तंत्रशा-
स्त्रेषु पतिधर्मं प्रचक्षते ।८। ध्वनेंद्रियाणि विहितो धर्मः का-
म्यः स एव हि । निष्कामनमनुष्ठानात्पतिधर्मत्वमप्ययेत् ॥
तत्रापि सर्वकर्मादावधिकारप्रदायकं । भस्मधारणमुख्यं
हि कालाग्न्युपनिषन्मुखैः ।९। आबालमुख्येभ्य विहितं त
पदे पदे । रुद्राक्षधारणं चैव रुद्रोपासनादिकं । कालयोः
शिवपूजा च त्रिषु कालेषु वा सदा । विद्यानुश्रुतिरुद्रस्थान
त्रैकादशिनी श्रुतौ । तत्र पंचाक्षरो मंत्रः शिव इत्यक्षरद्वयं । इति
श्रुतिशिरोरत्नपंचाक्षरमनोर्जपः । आचार्यदेव इत्युक्तमंत्रदे-
शिकपूजनं । प्रसादग्रहणं तस्येत्याद्याः पाशविमोचकाः । पतिध-

मेऽस्मिन्नैषा तत्ताऽनंतर्यमत्र च। अतः शब्दो नहि सर्वेषां न विशि
ष्यते। विषयस्तु द्वयोरैक्यं जीवस्य ब्रह्मणस्तथा। विरुद्धयोः स्वभा
वेन तमस्तेजः समानयोः। युष्मदस्मद्गोचरयोः कथमन्योन्यताभ
वेत्। किंचिज्ज्ञत्वं च जीवत्वं सर्वज्ञत्वं तदन्यता। अनित्यत्वं च नित्य
त्वं कथमेकत्र युज्यते। इति चेद्दीयतां दृष्टिः स्वत्वे भेर्ये सावधानतः
इदं रजत मित्येतत् ज्ञाने शुक्तौ भ्रमात्मिके। इदं त्वांशेन शुक्ति
त्वं रजतत्वमनंतरं। उभयं च यथाज्ञाते विरुद्धं च परस्परं।
शुक्तित्वं च प्रकारेतु रजतत्वं निवर्तते। तद्वदेवात्र सर्वज्ञे किं
चिज्ज्ञत्वं विशिष्यते। सर्वज्ञत्वे प्रकारे तु किंचिज्ज्ञत्वं निवर्तते। न
जीवब्रह्मणोरैक्यं शास्त्रस्य विषयं विदुः। मुक्तिः साधारणत्वेन

प्रयोजनमुदीर्यते। न जीवब्रह्मणोरैक्यं स्तत्रस्वरसतः स्फुरेत्। इति
माचक्षते शाक्ते विशिष्टं विषयस्त्विति। यथा घट इति ज्ञाने घट
त्वं स्याद्विशेषणं। तथा ब्रह्मणि वैशिष्ट्यं शाक्तैरिसवधार्यतां। अ
ग्निस्फुलिंगयोर्नास्ति यथा भेदः स्वरूपतः। अग्नित्वेन कणत्वेन
भेदेपि स्फुरति क्वचित्। यथा हि कुंडलमिति भेदाभेदौ त
श्रि थात्र च। तस्माच्छक्तिविशिष्टस्य जिज्ञासा ब्रह्मणः स्फुटं। घटस्थल
ज्ञानमप्यत्र मोक्षसाधनमुच्यते। लिंगमेव यतः शास्त्रे ब्रह्मेः
ति मुविच्यार्यते। सर्वत्र लिंगसंबंधं कुर्वंति प्रतिपत्तये। सर्वं ब्र
ह्मेति वेदार्थमनुसंधाय शांभवाः। ब्रह्मलिंगं जगन्मध्ये साधयेत
समार्थकाः। माध्वबौद्धादि च्यार्वाकमताध्वान्तसमर्थगणान्

चारविरुद्धंस्यान्नस्माकंमितिनमतं। नीलकंठशिवाचार्य
भाष्यार्थमनुसंधेहं। वीरशैवैरभिमतमभिधास्येश्रुतेर्म
तं। तस्माद्धर्मविचारस्यपश्चाद्ब्रह्मैवकेवलं। विचार्यंश्रव
णाद्यैश्चशांतिमभिर्जनैः सदाअग्निष्टोमादयोयागाअश्व
मेधावपानकाः। सर्वेतेशिवभक्त्यर्थंनिश्चितावेदशास्त्रयोः
कृतपुण्यजनाःसर्वेभक्तिंप्राप्यमहेश्वरं। प्राप्नुवंतिपरंधामजी
वन्मुक्ताश्चतेबुधाः। यदाचर्मवदाकाशंवेष्टयिष्यंतिमानवाः।
तदाशिवमविज्ञायदुःखस्यांतोभविष्यति। शिवएवपरंब्रह्मसः
च्चिदानंदलक्षणं। तदन्यन्नपरंकिंचित्तदतोध्येयमास्तिकैः सर्व
मन्यत्परित्यज्यशिवादन्यत्तुदैवतं शिवएवसदापूज्योमुमुक्षुभिः

रहन्निर्णीतं। अयमेव हि सिद्धांतः सर्ववेदेषु नान्यथा। तस्माल्लिं
गं ब्रह्मरूपैवमुपास्यं च मुमुक्षुभिः। लिंगांगसामरस्येन जीवब्र
ह्मैक्यं ... । कैवल्यमेव सर्वेषां आयतेन पुनर्भवः। ततो ह्यु
पनिषद्भाष्ये विचार्यं भुध्यमानसैः। लिंगे सुषुप्तिरिमे तैः सु
खं लिंगवतां परं। आलस्यादि तथान्यत्र प्रतिपादितमित्यथ॥
नमो ब्रह्मण इत्याद्यैस्तदेव हि दृढीकृतं। लिंगस्थापनमित्यादौ श्रु
तयः प्रतिपादितं। सर्वं ह्युपनिषद्भाष्ये प्रवृत्तं वर्णितं शिवं। त
थापि मानवा मूर्खास्तत्सज्जु लिंगधारणं। आचारो विपरीतो हि
युगधर्मानुसारतः। धनी ह्युदररोगस्थो न भुंक्ते सन्नमुत्तमं तद्व
नास्तिकशास्त्रार्थैर्मतिर्नो दे...ति कस्यचित्। शिवप्रसादसिद्धाः

ति

र्थः कृतकस्मात्तुयेनराः। धत लिंगांग भावाश्रय भविष्यंति गतज्व
राः। अथातो ब्रह्म जिज्ञासेसार भ्य आस सूत्रके। अनावृत्तिरिह्येतां
तं ब्रह्म विचारितं। धार्यं निश्चिस विहृ प्रि गुरु विश्वासततसरैः। र
हस्योपनिषद्वाक्यैर्वर्णितं ब्रह्म केवलं। अपरिछिन्न विभवमवा
ङ्मनसगोचरं। निष्कलं निर्मलं शुधं निर्विकल्पं निरंजनं। ज्ञाता
कथमुपास्यं हि निरस्तद्वैत लक्षणं। लक्षणेन प्रमाणेन वस्तु सिद्धि
रुदाहृता। जन्मादि कारणत्वं हि जगतां ब्रह्म लक्षणं। सर्व वेदांतवा
क्यानि प्रमाणानि न संशयः। एतैरापाततो ब्रह्म निश्चियस श्रवणादि
भिः। ब्रह्मैव सन् ब्रह्मवैतिय एवं वेदमानवः। द्वितीय सूत्रभासेन
सच्चिन्नर्थे समर्पितं। इति नीलकंठाचार्य रचित ब्रह्मसूत्रार्थ

प्रतिपादकवीरशैवभाष्योक्तशक्तिविशिष्टाद्वैतसिधांतावलं
बिनांवीरशैवानामप्राक्तनप्रामाण्यवक्ष्ये सिधांतशिखामणिः
वीरमाहेश्वरसंग्रह वीरशैवाचारसंग्रह वीरशैवरत्नाक
रशिवज्ञानशेखरवीरशैवप्रकाशिकावीरशैवानंदचंद्रिका
वीरशैवप्रदीपिका क्रियासारकैवल्यसारबसवमुवराजीयः
माचिदेवमनोविलासवीरशैवचिंतामणिवीरशैवसंजीवः
नपंडितचारित्रशिवप्रसंगरत्नाकरशिवज्ञानप्रदीपिकाशांकर
सारोधारवीरशैवाचारकौस्तुभनर्कचंद्रिकालिंगधारणचंद्रि
काशिवाद्वैतप्रदीपिकारेवणभाष्यसिधांतशेखरविशेषार्थप्रः
काशिकादिप्राचीनग्रंथेह भावचमुदाहृतनासर्वमनवघम

लंविस्तरेण। इतिश्रीवीरशैवोत्कर्षसंग्रहे समाप्तोजात: शुभंभव
तु। छ।। छ।। यादृशंपुस्तकं दृष्ट्वा तादृशंलिखितंमया। यदि शुद्ध
मशुद्धंवाममदोषोनदीयतां।१। भग्नपृष्ठकटिग्रीवस्तब्धदृष्टि
रधोमुखं। कष्टेनलिखितंग्रंथं यत्नेन प्रतिपालयत्। छ। इदंपु
स्तकं यतितनिवरजंगमवाटिकाधीश्वर हरिहरेश्वरस्वामिके
रपुष्करसंजात सिद्धेश्वरशर्मणा परार्थंलिखितं यत्पुस्तकं
तत्गौरीरमणार्पणमस्तु। अपरमिदंपुस्तकं अत्रिपुत्रपुत्र
वासर भाद्रपदार्जुनपक्षराकातिथिमवधीकृत्य संध्यासमये
समाप्तिजाता।। संमत् १९३८।। छ।। छ।। श्रीगुरुबसव लिंगायनः
म:। छ।। श्री।।

इतिवीरशैवोत्कर्षसंग्रहेसमाप्तिरगमत्॥